# प्रथमपत्रम्

# व्याकरणम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

## प्रथमभागः

## लघुसिद्धान्तकौमुदी

अ. विंशतिः प्रश्नाः समाधेयाः। (20×2=40)

1. कति माहेश्वरसूत्राणि?
2. "लघुसिद्धान्तकौमुदी" इति ग्रन्थस्य रचयिता कः?
3. केषां वर्णानाम् उच्चारणस्थानं कण्ठः?
4. 'इको यणचि' अस्य सूत्रस्य उदाहरणं किम्?

अथवा

उपेन्द्रः इत्यत्र कः सन्धिः? केन च सूत्रेण?

5. टिसञ्ज्ञाविधायकं सूत्रं किम्?
6. स्वादयः प्रत्ययाः कति? के च ते?
7. 'रामान्' अत्र णत्वस्य निषेधः केन सूत्रेण?

अथवा

'रामेषु' इत्यत्र मूर्धन्यादेशः केन सूत्रेण?

8. भसञ्ज्ञाविधायकं सूत्रं किम्?
9. उभशब्दः कस्मिन् वचने भवति?
10. 'होढः' इत्यस्य कः सूत्रार्थः?

11. किं नाम सम्प्रसारणम्?

अथवा

'दिव औत्' अनेन सूत्रेण किं विधीयते?

12. समासा: कति? के च ते?

13. 'अव्ययं विभक्ति॰' सूत्रमिदं पूरयत।

अथवा

'कृष्णश्रित:' इत्यत्र क: समास:? विग्रहश्च क:?

14. द्विगुसञ्ज्ञाविधायकं सूत्रं किम्?

15. बहुव्रीहिसमासे कस्य पदार्थस्य प्राधान्यं भवति?

16. 'सञ्ज्ञापरिभाषम्' इत्यत्र क: समास:? केन च सूत्रेण?

17. 'अजा' इत्यत्र क: प्रत्यय:?

18. 'टिड्ढाणञ्॰' सूत्रमिदं पूरयत।

19. 'वयसि प्रथमे' अस्य सूत्रार्थ: क:?

अथवा

'द्विगो:' अस्य उदाहरणं किम्?

20. 'युवति:' इत्यत्र क: प्रत्यय:? केन च सूत्रेण?

ब. यथेच्छं षट्प्रश्ना: समाधेया:। (6×5=30)

21. 'पावक:, दैत्यारि:' - अनयो: ससूत्रं सिद्धिर्विधेया।

अथवा

सच्चित्, तट्टीका - एतयो: प्रयोगयो: ससूत्रं सिद्धिर्विधेया।

22. रामेभ्यः, रामस्य एतयोः प्रयोगयोः ससूत्रं सिद्धिः कार्या।

अथवा

राजा, आभ्याम् अनयोः ससूत्रं सिद्धिः कार्या।

23. भूतपूर्वः धवखदिरौ अनयोः ससूत्रं सिद्धिः कार्या।

24. 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' अस्य सूत्रस्य सोदाहरणं व्याख्या कार्या।

25. एडका, कुमारी एतयोः ससूत्रं सिद्धिः कार्या।

अथवा

'सुप्तिङन्तं पदम्' अस्य सोदाहरणं व्याख्या कार्या।

26. 'अनेकमन्यपदार्थे' अस्य सूत्रस्य सोदाहरणं व्याख्या कार्या।

## द्वितीयः भागः

## अमरकोशः

स. **कयोश्चित् द्वयोः उत्तरं लिखत।** (2×5=10)

27. 'भूभूमिरचला. . . .' इत्यारभ्य पञ्च श्लोकाः लेखनीयाः।

28. वनम्, वृक्षः - इत्यनयोः अमरकोशानुगुणं पञ्च-पञ्च पर्यायशब्दाः लेखनीयाः।

अथवा

पुष्पम्, पिप्पलम् - इत्यनयोः अमरकोशानुसारं पञ्च-पञ्च पर्यायशब्दाः लेखनीयाः।

## अनुवादशिक्षणम्

द. यथेच्छं पञ्चानां संस्कृतवाक्यानां हिन्दीभाषया अनुवादः कार्यः। (5×2=10)

29. वृक्षात् पत्राणि पतन्ति?

30. शिक्षकः छात्रान् पाठं पाठयति।

31. रामः गृहात् विद्यालयं गच्छति।

32. विप्राय दानं ददाति।

33. छात्राः विद्यालये पठन्ति।

34. कृषकाः कृषिक्षेत्रे कार्यं कुर्वन्ति।

35. याज्ञिकः यागं करोति।

36. स्पर्धालुभिः सर्वत्र जयो लभ्यते।

य. यथेच्छं पञ्चानां हिन्दीवाक्यानां संस्कृतभाषया अनुवादः कार्यः। (5×2=10)

37. गांव के दोनों ओर वृक्ष हैं।

38. परोपकार के लिये वृक्ष फल देते हैं।

39. शिव को नमस्कार।

40. छात्र मैदान में खेलते हैं।

41. राम माता-पिता की सेवा करता है।

42. आज मेरे घर में एक साँप आया।

43. नगरों में बडे बडे मकान होते हैं।

44. संस्कृत में विज्ञान अन्तर्निहित है।